ध्रुव कृत भगवत् स्तुतिः

ध्रुव कृत भगवत् स्तुतिः

ध्रुव उवाच |
योऽन्तः प्रविश्य मम वाचमिमां प्रसुप्तां
संजीवयत्यखिलशक्तिधरः स्वधाम्ना |
अन्यांश्च हस्तचरणश्रवणत्वगादीन्
प्राणान्नमो भगवते पुरूषाय तुभ्यं || 1 ||

एकस्त्वमेव भगवन्निदमात्मशक्त्या
मायाख्ययोरुगुणया महदाद्यशेषं |
सृष्ट्वानुविश्य पुरुषस्तदसद्गुणेषु
नानेव दारुषु विभावसुवद्विभासि || 2 ||

त्वद्दत्तया वयुनयेदमचष्ट विश्वं
सुप्तप्रबुद्ध इव नाथ भवत्प्रपन्नः |
तस्यापवर्ग्यशरणं तव पादमूलं
विस्मर्यते कृतविदा कथमार्तबंधो || 3 ||

नूनं विमुष्टमतयस्तव मायया ते
ये त्वां भवाप्ययविमोक्षणमन्यहेतोः |
अर्चंति कल्पकतरुं कुणपोपभोग्य-
मिच्छंति यत्स्पर्शजं निरयेऽपि नृणां || 4 ||

या निर्वृतिस्तनुभृतां तव पादपद्म-
ध्यानाद्भवज्जनकथाश्रवणेन वा स्यात् |
सा ब्रह्मणि स्वमहिमन्यपि नाथ मा भूत्
किंत्वंतकासिलुलितात्पततां विमानात् || 5 ||

भक्तिं मुहुः प्रवहतां त्वयि मे प्रसंगो
भूयादनंत महताममलाशयानां |
येनांजसोल्बणमुरुव्यसनं भवाब्धिं
नेष्ये भवद्गुणकथामृतपानमत्तः || 6 ||

ते न स्मरंत्यतितरां प्रियमीश मर्त्यं
ये चान्वदः सुतसुहृद्गृहवित्तदाराः |
ये त्वब्जनाभ भवदीयपदारविंद-
सौगंध्यलुब्धहृदयेषु कृतप्रसंगाः || 7 ||

तिर्यङ्नगद्विजसरीसृपदेवदैत्य-
मर्त्यादिभिः परिचितं सदसद्विशेषं |
रूपं स्थविष्ठमज ते महदाद्यनेकं
नातः परं परम वेद्मि न यत्र वादः || 8 ||

कल्पांत एतदखिलं जठरेण गृह्णन्
शेते पुमान् स्वदृगनंतसखस्तदंके |
यन्नाभिसिंधुरुहकांचनलोकपद्म-
गर्भे द्युमान् भगवते प्रणतोऽस्मि तस्मै || 9 ||

त्वं नित्यमुक्तपरिशुद्धविबुद्ध आत्मा
कूटस्थ आदिपुरुषो भगवांस्त्र्यधीशः |
यद्बुद्ध्यवस्थितिमखंडितया स्वदृष्ट्या
द्रष्टा स्थितावधिमखो व्यतिरिक्त आस्से || 10 ||

यस्मिन् विरुद्धगतयो ह्यनिशं पतंति
विद्यादयो विविधशक्तय आनुपूर्व्यात् |
तद्ब्रह्म विश्वभवमेकमनंतमाद्य-
मानंदमात्रमविकारमहं प्रपद्ये || 11 ||

सत्याशिषो हि भगवंस्तव पादपद्म-
माशीस्तथानुभजतः पुरुषार्थमूर्तेः |
अप्येवमार्य भगवान् परिपाति दीनान्
वाश्रेव वत्सकमनुग्रहकातरोऽस्मान् || 12 ||

इति श्रीमद्भागवतमहापुराणे चतुर्थः स्कंधे नवमोऽध्याये ध्रुव कृत भगवत्स्तुतिः ||